# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३ ( Sem_6 ) | प्रश्नपत्र-५ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | (Old_Syllabus) | समयः - ११:०० तः ०२:०० |
| दिनाङ्कः - २२-०४-२०१६ | सन्दर्भग्रन्थः -श्रीमद्भागवतम् ( अष्टमस्कन्धः ), मार्कण्डेयपुराणम् | |

## युनिट-१

**प्रश्नः -१ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

*(१) आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ।*
*धर्मज्ञानोपदेशार्थं भगवान् पुत्रतां गतः ॥*

*(२) देव देव महादेव भूतात्मन् भूतभावन ।*
*त्राहि नः शरणापन्नांस्त्रैलोक्यदह्नाद् विषात् ॥*

*(३) नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः ।*
*यन्मायया मुषितचेतस इश दैत्य मर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥*

**प्रश्नः -२ कस्याप्येकस्य सविस्तरं वर्णनं क्रियताम् । ०८**

*(१) गजेन्द्रमोक्षकथा ।* *(२) मन्वन्तरवर्णनम् ।*

**प्रश्नः -३ प्रदत्तविषयेभ्यः द्वयोः टिप्पणी लेख्या । ०४**

*(१) शङ्करस्यविषयानम् ।* *(२) देवासुरयोर्युद्धम् ।*
*(३) भगवता धृतः मोहिनी अवतारः ।* *(४) गजेन्द्रेण कृता भगवत्स्तुतिः ।*

**प्रश्नः -४ अधोदत्तेभ्यः पञ्चानाम् एकैक वाक्येन उत्तरं दत्त । ०५**

*(१) कस्य मनोः वंशविस्तारं परीक्षित् श्रुतवान् ?*
*(२) आकूतिः कस्य पुत्रः ?*
*(३) भगवतः कपिलस्य वर्णनं शुकदेवः पूर्वं कुत्र कृतवान् ?*
*(४) मनुः तपस्तप्तुं सुनन्दया सह कुत्र गतः ?*
*(५) अष्टमस्कन्धे कति अध्यायाः ?*
*(६) राजा परीक्षित् किं व्रतमादाय कथां श्रृणोति ?*
*(७) क्षीरसागरे कः पर्वतः आसीत् ?*

## युनिट-२

**प्रश्नः -५ ससन्दर्भं कयोश्चिद् द्वयोः व्याख्या विधेया । ०८**

*(१) एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः ।*
*तेषामेवापमानेन सानुबन्धो विनङ्क्ष्यति ॥*

*(२) गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।*
*यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥*

*(३) अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः ।*
*सङ्कल्पास्तस्य सिद्ध्यन्ति स याति परमां गतिम् ॥*

**प्रश्नः -६ कस्याप्येकस्य सारं लिखत ।** ०८

*(१) कश्यपेन अदितिं प्रति प्रोक्तः पयोव्रतोपदेशः ।*

*(२) भगवतः मत्स्यावतारकथा ।*

**प्रश्नः -७ कस्याप्येकस्य टिप्पणी लेख्या ।** ०२

*(१) वामानावतारः ।* *(२) बलियज्ञप्रसङ्गः ।*

**प्रश्नः -८ अधस्तनेभ्यः द्वयोः एकैकवाक्येन उत्तरं यच्छत ।** ०२

*(१) वैवस्वतमनोः कियन्तः पुत्राः आसन् ?*

*(२) शुकदेवः परीक्षितं कतिमन्वन्तरकथां सुश्राव ?*

*(३) सूर्यपत्न्याः नाम किमासीत् ?*

*(४) अदितिः कस्य पत्न्यासीत् ?*

## युनिट-३

**प्रश्नः -९ ससन्दर्भं कयोश्चित् द्वयोः व्याख्या कार्या ।** ०८

*(१) यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।*
*याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥*

*(२) गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।*
*मया त्वमि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥*

*(३) दारिद्रयदुःखभयहारिणि का त्वदन्या सर्वोपकारकारणाय सदाऽऽर्द्रचित्ता ।*
*एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम् ॥*

**प्रश्नः -१० कस्याप्येकस्य वर्णनं कुरुत ।** ०८

*(१) शक्रादिदेवैः कृता भगवत्याः स्तुतिः ।* *(२) देव्याकृतः चण्डमुण्डवधः ।*

**प्रश्नः -११ अधस्तनेभ्यः द्वयोः टिप्पणी कार्या ।** ०४

*(१) देवैः कृता नारायणी स्तुतिः ।* *(२) रक्तबीजवधः ।*

*(३) देव्याः माहात्म्यम् ।* *(४) देव्या निहताः राक्षसाः ।*

**प्रश्नः -१२ पञ्चानां लघूत्तराणि लिखत ।** ०५

*(१) सावर्णिको नाम मनुः कस्यांशात् भविष्यति ?*

*(२) वैश्यः किं सूक्तं जपन् तपस्तेपे ?*

*(३) देवी सकलां बाधां कदा नाशयति ?*

*(४) सकलानभीष्टकामान् देवी कदा ददाति ?*

*(५) हविर्भुजः के सन्तु ?*

*(६) देव्यै कमण्डलुः कः ददौ ?*

---------------------